This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-1971
M-1972

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M १९७१ विषय कर्मकांड.
नाव. हिरण्यकेशीय पुन:संधान.
लेखक/लिपीकार गंगाधर अभ्यंकर (लिपीक).
पृष्ठ १२ काळ क्रोधसंवत्सर [✓ पूर्ण]/अपूर्ण

Checked 2012

M-1972
M-1971

M-1972
M-1971

नंकरिष्ये ॥ समित्त्रयमादाय ॥ ॐ अश्वलहि सत्येन त्वाहृयामीति त्रिः ॥ याः पुरस्तात्प्रस्रवंत्युपरिष्टात्सर्वतश्च याः ॥ ताभी रश्मिपवित्राभिः श्रद्धां यज्ञमारभे ॥ आकूत्यै त्वा कामाय त्वा समृधे त्वा ॥ पुरो दधे अमृतत्वाय जीवसे ॥ आकूतिमस्यावसे काममस्य समृध्यै ॥ इन्द्रस्य युंजते धियः ॥ आकूतिं देवीं मनसः पुरो दधे ॥ यज्ञस्य माता सुहवा मे अस्तु ॥ यदिच्छामि मनसा सकामः ॥ विदेयमेनद्धृदये निविष्टं ॥ हृदयालंभः ॥ उदकस्पर्शः ॥ प्राणायामः ॥ पुनः संधानहोमकर्मणि यक्ष्यमाणो देवतास्ताः सर्वाः परिग्रहीष्यामि ॥ जातवेदसमग्निमिध्मेन यक्ष्ये ॥ आघारहोमे ॥ प्रजापतिंमनुं आज्येन यक्ष्ये इंद्रं चाज्येन ॥ आज्यभागहोमे ॥ अग्निं सोमं चाज्येन ॥ सामान्यप्रधानहोमे ॥ अग्निं जातवेदसं संराधनीं संराधनीं देवीं प्रसाधनीं देवीं व्याहृतीनामग्निं वायुं सूर्यं प्रजापतिं चाज्येन ॥ वैशेषिकप्रधानहोमे ॥ मिंदवंतमग्निं द्विराज्येन ॥ तंतुमंतमग्निं त्रिराज्येन ॥ अभ्यावर्तिनमग्निं चतुराज्येन व्याहृतीनामग्निं वायुं सूर्यं प्रजापतिं चाज्येन ॥ अयासमग्निं मनस्वंतमग्निं प्रजापतिं सप्तवंतमग्निं वास्पतिं ब्रह्माणं चाज्येन ॥ अंगहोमे ॥ वरुणं द्विः ॥ अग्नीवरुणौ द्विः ॥ अयासमग्निं प्रजापतिं चाज्येन ॥ जयहोमे ॥ चित्तं । चित्तिं । आकूतं । आकूतिं । विज्ञातं । विज्ञानं । मनः । शक्वरीः । दर्शं । पूर्णमा

पू० उ० सं। बृहत्। रथंतरं। प्रजापतिं प्रत्येकमाज्येन यक्ष्ये।। अभ्यातानहोमे। अग्निं भूतानामधिपतिं। इंद्रं ज्येष्ठा
२ नामधिपतिं। यमं पृथिव्या अधिपतिं। वायुं अंतरिक्षस्याधिपतिं। सूर्यं दिवोऽधिपतिं। चंद्रमसं नक्षत्रा
णामधिपतिं। बृहस्पतिं ब्रह्मणोऽधिपतिं। मित्रं सत्यानामधिपतिं। वरुणं अपामधिपतिं। समु
नामधि ४ द्रं स्रोत्यानां पतिं। अन्नं साम्राज्यानामधिपतिं। सोमं ओषधीनामधिपतिं। सवितारं प्रसवाना
मधिपतिं। रुद्रं पशूनामधिपतिं। अप उपस्पृश्य। त्वष्टारं रूपाणामधिपतिं। विष्णुं पर्वतानाम
धिपतिं। मरुतो गणानामधिपतीन्। प्राचीनावीति। पितॄन् पितामहान् परान् अवरांश्च प्रत्येकमाज्ये
न यक्ष्ये। उदकस्पर्शः। राष्ट्रभृद्धोमे। अग्निं गंधर्वं ओषधीरप्सरसः।। सूर्यं गंधर्वं मरीचीरप्स
रसः। चंद्रमसं गंधर्वं नक्षत्राण्यप्सरसः। यज्ञं गंधर्वं दक्षिणा अप्सरसः। मनो गंधर्वं ऋक्सामा
न्यप्सरसः। वातं गंधर्वं अपो अप्सरसः। भुवनस्य पतिं मृत्कं गंधर्वं विश्वमप्सरसः। पर्जन्यं गंध
र्वं विद्युतोऽप्सरसः। अमृडयं मृत्कं गंधर्वं प्रजा अप्सरसः। कामं गंधर्वं आधीरप्सरसः। स नो
भुवनस्य पतिं च प्रत्येकमाज्येन यक्ष्ये।। स्विष्टकृद्धोमे। अग्निं स्विष्टकृतं हुतशेषेण यक्ष्ये। त्रिवृदन्न
होमे। अग्निं त्रिवृदन्नेन। सोमं त्रिवृदन्नेन। अग्निमन्नादं त्रिवृदन्नेन। अग्निमन्नपतिं त्रिवृदन्नेन २

प्रजापतिं त्रिवृदन्नेन। विश्वान्देवांस्त्रिवृदन्नेन। सर्वा देवतास्त्रिवृदन्नेन। अग्निं स्विष्टकृतं त्रिवृदन्ने
न। वास्तुपतिं बलीकरणेन यक्ष्ये। प्रायश्चित्तहोमे। अग्निं त्रिराज्येन। अग्नीवरुणौ द्विराज्ये
न। इंद्रं द्विराज्येन। त्र्यंबकं विष्णुं अग्निं वायुं सूर्यं बृहस्पतिं वरुणं इंद्रं विश्वान्देवांश्चाज्येन।
संस्रावहोमे। वसून् रुद्रानादित्यान् संस्रावभागान् संस्रावेणाज्येन एता देवताः सद्यो
यक्ष्ये। ॐ भूर्भुवः स्वः स्वाहा। प्रजापतय इदं०। समिधोऽग्नावाधाय। एषा हि देवः प्रदिशो०
अंतः। स वि० विश्वतोमुखः। यथाहतद्वसवा० आयुः। प्रदक्षिणमग्निं परिसमूह्य। परिस्ती
र्य। पुरस्ताद्दक्षिणतः पश्चादुत्तरतः। दक्षिणतः ब्रह्मण इदमासनं। उत्तरतः ब्रह्मप्रणी
ताय इदमासनं। दर्भाग्रद्वयं हृदि गृहीत्वा। मयि गृह्णाम्यग्रे अग्निं रायस्पोषाय सुप्रजा
स्त्वाय सुवीर्याय। मयि प्रजां मयि वर्चो दधाम्यरिष्टाः स्याम तन्वा सुवीराः। यो नो अ
ग्निः पितरो हृत्स्वंतरमर्त्यो मर्त्यां आविवेश। तमात्मन्परिगृह्णीमहे वयं मा सो अस्मां अवहा
य परागात्। उत्तरतः कुशोपरि पात्राण्यासादयति। दर्वी। आज्यस्थाली। प्रणीताप्रणयनं। प्रोक्षणी
०। इध्मं। बर्हिः। उपवेषं। संमार्गदर्भान्। अवज्वलनदर्भान्। प्रादेशमात्रीः समिधः। त्रिवृदन्नं। आ

तेपवित्रेआज्यपात्रेनिधाय ॥ ६

पू० । ३० ऽयंत्वासादयामि।ततोब्रह्माणंआवाहयेत्।उत्तरतोब्रह्मायज्ञोपवीतंकृत्वाऽपआचम्यापरेणाग्निं
२ २ दक्षिणातिक्रम्य।ब्रह्मसदनात्तृणंनिरस्यापउपस्पृश्याग्निमभिमुखउपविशति।समावप्रच्छिन्ना
ग्रौकुशौप्रादेशमात्रौपवित्रेकृत्वाऽन्येनरवेनच्छित्वाद्भिरनुमृज्यप्रणीतापात्रेत्रिःप्रक्षाल्य
प्रागग्रपवित्रांतर्हितामाद्भिःपूरयित्वोदगग्राभ्यांपवित्राभ्यांत्रिरुत्पूयोत्तरेणाग्निंदर्भेषुसादयि
त्वापरैर्दर्भैरपिदधाति।त्रिःपवित्रंप्रोक्ष = द = णीःसंस्कृत्ययथापुरस्तात्बिल्ववंकतानानिकृत्वा विधा
येध्मंत्रिःसर्वाभिःप्रोक्षति।दर्वींनिष्टप्यसंमृज्यपुनर्निष्टप्यनिदधाति।संमार्गानभ्युक्ष्याग्नावा
दधाति।आज्यंविलाप्यपवित्रांतर्हितायामाज्यस्थाल्यामाज्यंनिरूप्यउपवेषेणोदीचोंगारान्निरु
ह्यतेष्वधिश्रित्यावद्योत्यदर्भतरुणाभ्यांप्रत्यस्यत्रिःपर्यग्निकृत्वादगुद्वास्योपवेषेणांगारानुप्रत्यू
ह्योपवेषंनिरस्यापउपस्पृश्यापरेणाग्निंबर्हिरास्तीर्णेतत्राज्यपात्रंनिधायोदगग्राभ्यांपवि
त्राभ्यांपुनराहारमाज्यंत्रिरुत्पूयपवित्रेप्रोक्ष्याग्नावाधायशम्याभिःपरिदधाति।अपरेणाग्निमु
दीचीनकुंवांमध्यमांनिदधाति।दक्षिणेनाग्निंसंस्पृष्टांमध्यमयाप्राचीनकुंवां।उत्तरेणा
ग्निंसंस्पृष्टांमध्यमयाप्राचीनकुंवां।अथपरिषिंचति।अदितेनुमन्यस्वेतिदक्षिणतःप्रा २

चीनं अनुमतेनुमन्यस्वेतिपश्चादुदीचीनंसरस्वत्यनुमन्यस्वेतिउत्तरतःप्राचीनंदेवसवितःप्रसुवेतिसर्वतःप्रदक्षि
णंपरिषिच्येध्ममंकुशाभ्यादधाति।ॐ अयंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचेद्धवर्धयचास्मान्प्रजयाप
शुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहा।जातवेदसेअग्नयइदं० अथदर्व्याजुहोति।उत्तरंपरिधिसंधिम
न्ववहृत्य।प्रजापतयेमनसेस्वाहा।तिर्यंचमाघारयति।प्रजापतयेमनसइदं० दक्षिणंपरिधिसंधिमन्वव
हृत्य।इन्द्रायस्वाहा।तिर्यंचमाघारयति।इन्द्रायेदं० अग्नयेस्वा० उत्तरार्धपूर्वार्धेजुहोति।अग्नयइदं०
सोमायस्वाहा।दक्षिणार्धपूर्वार्धेजुहोति।सोमायेदं० तावंतरेणेतराजुहोति।अथसामान्यप्रधानहोमः॥
युक्तोवहजातवेदःपुरस्तादग्नेविद्धिकर्मक्रियमाणंयथेदं।त्वंभिषग्भेषजस्यासिकर्तात्वयागाअ
श्वान्पुरुषान्सनेमस्वाहा।जातवेदसेअग्नयइदं० यातिरश्चीनिपद्यसेहंविधरणीइति।तांत्वाघृतस्यधा
रयाग्नौसंराधनींयजेस्वाहा।संराधन्याइदं० संराधन्यैदेव्यैस्वाहा।संराधन्यैदेव्याइदं० प्रसा
धन्यैदेव्यैस्वाहा।प्रसाधन्यैदेव्याइदं० भूःस्वाहा।अग्नयइदं० भुवःस्वाहा।वायवइदं० स्वःस्वाहा।
सूर्यायेदं० भूर्भुवःस्वःस्वाहा।प्रजापतयइदं० अथप्रधानहोमः।यन्मआत्मनोमिंदाभूदग्निस्त
त्पुनराहार्जातवेदाविचर्षणिःस्वाहा।मिंदवतेअग्नयइदं० पुनरग्निश्चक्षुरदात्पुनरिन्द्रोबृहस्पतिः।पुन
र्मेअश्विनायुवंचक्षुराधत्तमक्ष्योःस्वाहा।मिंदवतेअग्नयइदं० तंतुंतन्वन्रजसोभानुमन्विहिज्योतिष्म

पू० उ० ४

तःपथोरक्षधियाकृतान्। अनुल्बणंवयतजोगुवामपोमनुर्भवजनयादैव्यंजनꣳस्वाहा। तंतुमतेग्नयइदं०
उद्बुध्यस्वाग्नेप्रतिजागृह्येनमिष्टापूर्तेसꣳसृजेथामयंच। पुनःकृण्वꣳस्त्वापितरंयुवानमन्वाताꣳ
सीत्त्वयितंतुमेतꣳस्वाहा। तंतुमतेग्नयइदं० त्रयस्त्रिꣳशत्तंतवोयेवितत्निरेयइमंयज्ञꣳस्वधया
ददंतेतेषांछिन्नंप्रत्येतद्दधामिस्वाहा। घर्मोदेवाꣳअप्येतुस्वाहा। तंतुमतेग्नयइदं० अग्नेभ्याव
र्तिन्नभिनआवर्तस्वायुषावर्चसासन्यामेधयाप्रजयाधनेनस्वाहा। अभ्यावर्तिनेग्नयइदं०
अग्नेअंगिरःशतंतेसंत्वावृतःसहस्रंतउपावृतः। तासांपोषस्यपोषेणपुनर्नोनष्टमाकृधि
पुनर्नोरयिमाकृधिस्वाहा। अभ्यावर्तिनेग्नयइ० पुनरूर्जानिवर्तस्वपुनरग्नइषायुषा।
पुनर्नःपाहिविश्वतःस्वाहा। अभ्यावर्तिनेग्नय० सहरय्यानिवर्तस्वाग्नेपिन्वस्वधारया। वि
श्वप्स्न्याविश्वतस्परिस्वाहा। अभ्यावर्तिनेग्न० भूःस्वाहा। अग्नयइ० भुवःस्वाहा। वायवइदं०
सुवःस्वाहा। सूर्यायइ० भूर्भुवःस्वःस्वाहा। प्रजापतयइ० अयाश्चाग्नेस्यनभिशस्तीश्च
सत्यमित्वमयाअसि। अयसामनसाधृतोयसाहव्यमूहिषेयानोधेहिभेषजꣳस्वाहा। अयसे
ग्नयइ० मनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञꣳसमिमंदधातु। याइष्टाउषसोनिम्रुचश्चताः ४

संदधामिहविषाघृतेनस्वाहा। मनसेज्योतिषइदं० प्रजापतेनत्वदेता० रयीणाꣳस्वाहा। प्रजापतयइ०
सप्ततेअग्नेसमिधःसप्तजिह्वाःसप्तऋषयःसप्तधामप्रियाणि। सप्तहोत्राःसप्तधात्वायजंतिसप्त
योनीरापृणस्वाघृतेनस्वाहा। सप्तवतेग्नयइ० चित्तिःस्रुक्। ० आस्माकंनेम्णंधात्स्वाहा। वाच
स्पतयेब्रह्मणइदं० इतिप्रधानहोमः। अथांगहोमः। इमंमेवरुण० चकस्वाहा। वरुणायेदं० तत्वा
यामिब्रह्मणा० प्रमोषीस्वाहा। वरुणायेदं० त्वन्नोअग्नेवरुणस्य० ध्यस्मत्स्वाहा। अग्नीव
रुणाभ्यामि० सत्वन्नोअग्ने० एधिस्वाहा। अग्नीवरुणाभ्यामिदं० त्वमग्नेअयास्ययासन्म
नसाहितः। अयासन्हव्यमूहिषेयानोधेहिभेषजꣳस्वाहा। अयसेग्नयइ० प्रजापतेनत्वदेता०
णाꣳस्वाहा। प्रजापतयइ० इत्यंगहोमः। अथजयहोमः। चित्तंचस्वाहा। चित्तायेदं० चित्तिश्च
स्वाहा। चित्तयइदं० आकूतंचस्वाहा। आकूतायेदं० आकूतिश्चस्वाहा। आकूत्याइदं० विज्ञातं
चस्वाहा। विज्ञातायेदं० विज्ञानंचस्वाहा। विज्ञानायेदं० मनश्चस्वाहा। मनसइदं० शक्करीश्चस्वाहा
शक्करीभ्यइदं० दर्शश्चस्वाहा। दर्शायेदं० पूर्णमासश्चस्वाहा। पूर्णमासायेदं० बृहच्चस्वाहा। बृहत
इदं०। रथंतरंचस्वाहा। रथंतरायेदं० प्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रः पृतनाज्येषुतस्मै

पू०उ० विशः समनमंत सर्वाः सउग्रः सइहहव्योबभूवस्वाहा। प्रजापतयइ० इतिजयहोमः। अथाभ्यातानहोमः॥
अग्निर्भूतानामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेव
५ हूत्यांस्वाहा। अग्नयेभूतानामधिपतयइदं० इंद्रोज्येष्ठानामधिपतिः समावत्वस्मिन्ब्रह्मन्न० स्वाहा। इं
द्रायज्येष्ठानामधिपतयइ० यमः पृथिव्या अधिपतिः समावत्वस्मिन्० हा। यमायपृथिव्या अधिपतयइ०
वायुरंतरिक्षस्याधिपतिः समावत्वस्मिन्० हा। वायवेंतरिक्षस्याधिपतयइ० सूर्योदिवोधिपतिः
समावत्वस्मिन्० हा। सूर्यायदिवोधिपतयइ० चंद्रमानक्षत्राणामधिपतिः समावत्वस्मिन्० हा।
चंद्रमसेनक्षत्राणामधिपतयइ० बृहस्पतिर्ब्रह्मणोधिपतिः समाव० बृहस्पतयेब्रह्मणोधिपतय
इदं० मित्रः सत्यानामधिपतिः समावतु० हा। मित्रायसत्यानामधिपतयइदं० वरुणोपाम
धिपतिः समाव० हा। वरुणायअपामधिपतयइ० समुद्रः स्रोत्यानामधिपतिः समावतु० हा।
समुद्रायस्रोत्यानामधिपतयइ० अन्नंसाम्राज्यानामधिपतितन्मावतु० अन्नायसाम्रा
ज्यानामधिपतिनइदं० सोमओषधीनामधिपतिः समावतु० हा। सोमायओषधीनामधि
पतयइ० सविताप्रसवानामधिपतिः समावतु० हा। सवित्रेप्रसवानामधिपतयइदं० रुद्रः प ५

शूनामधिपतिः समा० रुद्रायपशूनामधिपतयइ० उदकस्पर्शः। त्वष्टारूपाणामधिपतिः समा० हा।
त्वष्ट्रेरूपाणामधिपतय० विष्णुः पर्वतानामधिपतिः समा० विष्णवेपर्वतानामधिपतयइ० मरुतो
गणानामधिपतयस्तेमावंत्वस्मिन्० मरुद्भ्योगणानामधिपतिभ्यइ० प्राचीनावीति। पितरः पि
हा तामहाः परेवरे ततास्ततामहा इहमावता। अस्मिन्ब्रह्मन्नस्मिन्० पितृभ्यः पितामहेभ्यः परेभ्यावरे
भ्यस्ततेभ्यस्ततामहेभ्यइदं० यज्ञोपवीती अपउपस्पृश्य। अथराष्ट्रभृद्धोमः। ऋताषाडृत
धामाग्निर्गंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा। अग्नयेगंधर्वायेदं० तस्यौषधयोप्सरस ऊ
र्जोनामुताइदंब्रह्मक्षत्रंपांतुताभ्यःस्वाहा। ओषधीभ्योप्सरोभ्यइदं० संहितोविश्वसामा
सूर्योगंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा। सूर्यायगंधर्वायेदं० तस्यमरीचयोप्सरस आयु
वोनामताइदंब्रह्मक्षत्रंपांतुताभ्यःस्वाहा। मरीचिभ्योप्सरोभ्यइदं० सुषुम्नः सूर्यरश्मिश्चंद्र
मागंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा। चंद्रमसेगंधर्वाय० तस्यनक्षत्राण्यप्सरसोबेकुर
योनामताइदंब्रह्मक्षत्रंपांतुताभ्यःस्वाहा। नक्षत्रेभ्योप्सरोभ्यइदं० भुज्युः सुपर्णोयज्ञोगंध

यु० उ०
६

वेः सइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा॥ यज्ञायगंधर्वायेदं० तस्यदक्षिणाअप्सरसस्तवानामताइदंब्रह्मक्षत्रं
पांतुताभ्यः स्वाहा। दक्षिणाभ्योप्सरोभ्य इदं० प्रजापतिर्विश्वकर्मामनोगंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मै
स्वाहा। मनसेगंधर्वायेदं० तस्यऋक्सामान्यप्सरसएष्टयोनामताइदंब्रह्मक्षत्रंपांतुताभ्यः स्वाहा। ऋ
क्सामेभ्योप्सरोभ्य इदं० इषिरोविश्वव्यचावातोगंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा। वातायगंधर्वा
यदं० तस्यापोप्सरसोमुदानामताइदंब्रह्मक्षत्रंपांतुताभ्यः स्वाहा। अद्भ्योप्सरोभ्य इदं० भुवनस्यपते
यस्यतउपरिगृहाइहच। सनोरास्वाज्यानिꣳरायस्पोषꣳसुवीर्यꣳसंवत्सरीणाꣳस्वस्तिꣳस्वाहा।
भुवनस्यपतयइदं० परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा। मृत्यवेगंधर्वायेदं० तस्य
विश्वमप्सरसोभुवानामताइदंब्रह्मक्षत्रंपांतुताभ्यः स्वाहा। विश्वस्मा अप्सरोभ्य इदं० सुक्षितिः सुभू
तिर्भद्रकृत्स्वर्वान्पर्जन्योगंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा। पर्जन्यायगंधर्वायेदं० तस्यविद्यु
तोप्सरसोरुचोनामताइदंब्रह्मक्षत्रंपांतुताभ्यः स्वाहा। विद्युद्भ्योप्सरोभ्य इदं० दूरेहेतिरमृडयोमृ
त्युर्गंधर्वः सइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा। अमृडयायमृत्यवेगंधर्वायेदं० तस्यप्रजाअप्सरसोभी
रुवोनामताइदंब्रह्मक्षत्रंपांतुताभ्यः स्वाहा। प्रजाभ्योप्सरोभ्य इदं० चारुः कृपणकाशीकामोगंधर्वः स ६

म

इदंब्रह्मक्षत्रंपातुतस्मैस्वाहा। कामायगंधर्वायेदं० तस्याधयोप्सरसः शोचयंतीर्नामताइदंब्रह्मक्षत्रंपां
तुताभ्यः स्वाहा। आधिभ्योप्सरोभ्य इदं० सनोभुवनस्यपतेयस्यतउपरिगृहाइहच। उरुब्रह्मणेस्मैक्षत्राय
महिशर्मयच्छस्वाहा। सनोभुवनस्यपतयइदं० यदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं। अग्निष्टत्स्वि
ष्टकृद्विद्वान्सर्वꣳस्विष्टꣳसुहुतंकरोतुमे। अग्नयेस्विष्टकृतेसुहुतहुतेसर्वहुतआहुतीनांकामा गे ते
नांसमर्धयित्रेस्वाहा। अग्नयेस्विष्टकृतइदं० अथत्रिवृदन्नहोमः। उपस्तीर्णओदनस्यापूपानांꣳ
सक्तूनामितिसमवदायसर्पिर्मिश्रस्यजुहोति। अग्नयेस्वाहा। अग्नयइदं० सोमायस्वा० सोमाये
दं० अग्नयेन्नादायस्वा० अग्नयेन्नादायेदं० अग्नयेन्नपतयेस्वा० अग्नयेन्नपतयइदं० प्रजापतयेस्वा०
प्रजापतयइदं० विश्वेभ्योदेवेभ्यःस्वा० विश्वेभ्योदेवेभ्यइदं० सर्वाभ्योदेवताभ्यःस्वाहा। सर्वाभ्योदेव
ताभ्यइदं० अग्नयेस्विष्टकृतेस्वा० अग्नयेस्विष्टकृतइदं० उत्तरतःप्रागग्रेषुदर्भेषुबलिंकरोति।
वास्तुपतयेस्वा० वास्तुपतयइदं० परिषिच्य। त्रिवृदन्नहोमाख्यस्यकर्मणःपुण्याहंभवंतोब्रुवंतु। ॐ
पुण्याहमितिविप्राः। त्रिवृदन्न० णेस्वस्तिभ० आयुष्मतेस्वस्ति। त्रिवृद० णः ऋद्धिंभ० त्रिवृद० णः
श्रीर० अस्तुश्रीः। त्रिवृद० कल्याणंभ० अस्तुकल्याणं। श्रुवप्रहरणं। रुद्रायपशुपतयेस्वाहा। रु
द्रायपशुपतयइदं० अपउपस्पृश्य। परिध्यंजनं। परिसमूहनं। यथाहृतं० आयुः। बर्हिभ्यः प्रस्त

पू. ५०

८

रणेभ्यः कानिचित्तृणान्याहृत्य दर्व्यामग्राण्यनक्ति । अग्रं दर्व्यां । मध्यमूल आज्यस्थाल्यां । १ । अग्रं दर्व्यां
मूलमध्य आज्यस्थाल्यां । २ । मूलमध्य आज्यस्थाल्यां । अग्रं दर्व्यां । ३ । एकं तृणमप आदाय बर्हिरनु
प्रहरति । सर्पेभ्यः स्वाहा । अथान्यत्तृणमनुप्रहरति । सर्पेभ्य इदं० एतद्दत्तेदत्तेन । अंगुल्या त्रिर्निर्दिशति
प्राणं । चक्षुः । पृथिवीं । अपउपस्पृश्य । मध्यमं परिधिमग्नौ प्रहरति । सहेतरौ प्रहरति । मध्यमं मध्ये
करोति । कृतस्य कर्मणो न्यूनातिरिक्तदोषपरिहारार्थं अनाज्ञातादित्रयप्रायश्चित्तहोमं करिष्ये । अ
नाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं स्वाहा । अग्नय इ०
पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः । अग्ने तदस्य० स्वाहा । अग्नय इ० यत्पाकत्रा मनसा दीन
दक्षा न यज्ञस्य मन्वते मर्तासः । अग्निष्टद्धोता क्रतुविद्विजानन् यजिष्ठो देवां ऋतुशो यजाति
स्वाहा । अग्नय इ० त्वन्नो अग्ने वरुण० स्मत्स्वाहा । अग्नीवरुणाभ्यामिदं० स त्वन्नो अग्ने० धि स्वा
हा । अग्नीवरुणाभ्यामिदं । यत इंद्र भयामहे ततो नो अभयं कृधि । मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि
मृधो जहि स्वाहा । इंद्रायेदं० स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेंद्रः पुर एतु नः स्वस्तिदा अभ
यंकरः स्वाहा । इंद्रायेदं० त्र्यंबकं यजामहे० तात्स्वाहा । त्र्यंबकायेदं० इदं विष्णुर्विचक्रमे० सुरे स्वा ८

हा । विष्णव इ० भूः स्वाहा । अग्नय इ० भुवः स्वा० वायव इ० स्वः स्वाहा । सूर्यायेदं० महः स्वाहा । बृहस्पतय इ०
जनः स्वा० वरुणायेदं० तपः स्वाहा । इंद्रायेदं० सत्यं स्वाहा । विश्वेभ्यो देवेभ्य इदं० यथासंभवं नैमित्तिक
प्रायश्चित्तं कृत्वा । अस्मिन्कर्मणि मंत्रतंत्रकर्मविपर्यासाद्यज्ञानितप्रत्यवायपरिहारार्थं त्वन्नः स त्वन्न इत्या
ज्याहुती होष्यामि । त्वन्नो अग्ने वरुणस्य० स्मत्स्वाहा । अग्नीवरुणाभ्यामिदं० स त्वन्नो अग्ने अवमो० धि
स्वाहा । अग्नीवरुणाभ्यामिदं० अस्मिन्कर्मणि स्वराक्षरपदवर्णभ्रेषजनितप्रत्यवायपरिहारार्थं आभिर्गी
र्भिरित्येकामाज्याहुतिं होष्यामि । आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो
महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम स्वाहा । इंद्राय हरिवत इदं० अस्मिन्क० स्वाहाकारैं आ [illegible]
हुतिपाताभावजनितप्रत्यवायपरिहारार्थं मनो ज्योतिरित्याज्याहुतिं होष्यामि । मनो ज्योतिर्जुषतामाज्यं
विच्छिन्नं यज्ञं समिमं दधातु । या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहा । मनसे
ज्योतिष इदं० अस्मिन्क० मक्षिकाकेशलमिकीट[illegible]पतंगाद्युपघातदोषपरिहारार्थं द्वे मिंदाहुती हो
ष्यामि । यन्म आत्मनो मिंदाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिः स्वाहा । मिंदवतेऽग्नय इ० पुन
रग्निश्चक्षुरदात्पुनरिंद्रो बृहस्पतिः । पुनर्मे अश्विना युवं चक्षुराधत्तमक्ष्योः स्वाहा । मिंदवतेऽग्नय इदं०
अस्मिन्क० अग्न्युपघातदोषपरिहारार्थं प्रायश्चित्तं करिष्ये । पुनस्त्वादित्या रुद्रा वसवः समिंधतां

अपासन्मृत्युमीहिषे २

पू॰ उ॰ पुनर्ब्रह्मास्योवसुनीथयज्ञैः।घृतेनत्वंतनुवोवर्धयस्वसत्याःसंतुयजमानस्यकामाः।इतिमंत्रमुक्त्वाऽग्नौ
८ समिधमादध्यात्।अनेनैवमंत्रेणाज्याहुतिश्च।आदित्यरुद्रवसुब्रह्मभ्य इदं०अस्मिन्यागेपरिस्तर
णदाहजनितप्रत्यवा०यंप्रायश्चित्तंक०त्वमग्ने अयास्ययासन्मनसाहितः।सानोधेहि भेषज॰ हा॥
अयास्याग्नय इदं०प्रजापतेनत्वदे०हा।प्रजापतय इ०इध्मदाहेशुल्बदाहे परिस्तरणवत्प्रायश्चित्तं।अस्मि
न्यागेप्रणीतास्कन्नप्रोक्षणस्रावादिजनितप्रत्यवायपरिहारार्थंप्रायश्चित्तंक०आपोहिष्ठेतितिसृभिः
पुनरद्भिस्तत्पात्रंपूरयित्वाआज्याहुतिंदद्यात्।तत्त्वंम आपस्तदुतायतेपुनःस्वादिष्ठाधीतिरुचथाय
स्यते।अयं समुद्र उत विश्वभेषजः स्वाहाकृतस्यसमुतृप्णुतभुवः स्वाहा।ऋभुभ्य इदं०अस्मिन्क०
आयतनाद्बहिरङ्गारगमनजनितप्रत्य०प्रायश्चित्तंक०पुनःप्रक्षेप्तुमसमर्थश्चेद्धुआदायसमस्तव्या
हृतिभिरग्नौप्रक्षिप्यसर्वप्रायश्चित्तंकुर्यात्।तद्यथा।ओंभूर्भुवःस्वःस्वाहा।प्रजापतय इ०इत्याहुतिं
हुत्वा।अनाज्ञातत्रयमिदं विष्णुरित्यृचंभूर्भुवःस्वरितिजपेत्।एतदंतंसर्वंप्रायश्चित्तं।वसुभ्योरुद्रे
भ्य आदित्येभ्यःस्वाहा।वसुभ्योरुद्रेभ्यआदित्येभ्यःसंस्रावेभ्य इदं०बर्हिषिपूर्णपात्रंनिनयेत्।
सदसिसन्मेभूयाःसर्वमसिसर्वंमेभूयाःपूर्णमसिपूर्णंमेभूयाअक्षितमसिमामेक्षेष्ठाः।प्राच्यां ८
दिशिदेवाऋत्विजोमार्जयंतांदक्षिणायांदिशिमासाःपितरोमार्जयंतांप्रतीच्यांदिशिगृहाःप

शवोमार्जयंतामुदीच्यांदिश्यापओषधयोवनस्पतयोमार्जयंतामूर्ध्वायांदिशियज्ञःसंवत्सरोयज्ञप
वि तिर्मार्जयंतां।प्रतिदिशमुत्सिंचति।समुद्रंवःप्रहिणोमिअक्षिताःस्वांयोनिमभिगच्छत।अच्छिद्रःप्रज म्य
याभूयासंमापरासेचिमत्पयः।शेषंनिनयति।यद्वस्तुतसरस्वतिगोष्वश्वेषुयन्मधु।तेनमेवाजिनीव
तिमुखमङ्धि सरस्वति।मुखंसंमृज्य।ब्रह्मणेपूर्णपात्रंतत्स्थानिनिधिभूतंयथाशक्तिदक्षिणांदद्यात्
महमुत्सृज्ये।ब्रह्माणंविसर्जयामि।परिस्तरणान्युत्तरेविसृजेत्।उत्तरपरिषेकः।अदितेन्वमं
स्थाः।अनु०सर०देवसवितःप्रासावीः।यज्ञनमस्तेयज्ञ।नमोनमश्चतेयज्ञ।शिवेनम०उपतेनमः
इत्युपस्थाय।सर्वमंत्रमुतिष्ठतिमेधावीतेजस्वीवर्चस्वीब्रह्मवर्चसी।आयुष्मान्भूयासं।स्वस्तिश्र
द्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं।आयु०हन।अग्निंसंपूज्य।अग्नयेनमइतिचंदनादिदक्षि
दत्त्वा।अग्नेनयसु०।विधेमःमंत्रपुष्पंस०।मानस्तोकेत०।विधेमते।त्र्यायुषंजमदग्नेःकश्यपस्य
त्र्यायुषंयद्देवानांत्र्यायुषंतन्मेअस्तुत्र्यायुषं।इतिविभूतिंधृत्वा।यस्यस्मृत्या०मच्युतं।प्रमादात्०
दितिस्मृतिः।अनृणाअस्मिन्ननृणाःपरस्मिंस्तृतीयेलोकेअनृणास्याम।येदेवयानाउतपि
तृयाणाःसर्वान्पथोअनृणाआक्षीयेम।शात्वाहोताहुतेनैवविधिनाविधिनापिना।प्रीणातुभग

आ० स्था०
९

वानीयःकर्मणानेनभगस्थलः। कांडद्वयोपपाद्यायकर्मब्रह्मस्वरूपिणे। स्वर्गापवर्गदात्रेचयज्ञेशायन
मोनमः। विष्णुंस्मृत्वा। अनेनपुनःसंधानाख्येनकर्मणाभगवान्परमेश्वरःप्रीयतां॥ ॥छ॥ श्रीः
स्रुमुख० थं पुनःसंधानांगभूताग्नेयस्थालीपाकेनयक्ष्ये। अग्निंप्रज्वाल्य। चत्वारिशृंगेतिध्यात्वा।
क्रियमाणआग्नेयस्थालीपाकहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये। समित्त्रयमादाय। अ
स्मिन्हित्यादिप्रयोगपमानंकृत्वा। आग्नेयस्थालीपाकहोमकर्मणियेयक्ष्यमाणादेवतास्ताःपरि
ग्रहीष्यामि। अग्निंएकयाचर्वाहुत्यायक्ष्ये। अग्निंस्विष्टकृतंएकयाचर्वाहुत्यायक्ष्ये। एतेदेवते
सद्योयक्ष्ये। ॐ भूर्भुवःस्वःस्वाहा। प्रजापतयइ० समिधोग्नावाधाय। एषाहिदेवः प्र० मुखं
यथाहृतहु० आयुः। परिस्तीर्य। प्रागुदक्षिणतः। पश्चादुत्तरतः। अग्नेरुत्तरतोदर्भानास्तीर्य
तेषुपात्राण्यासादयति। दर्वीआज्यस्थालींप्रोक्षणीपात्रंतंडुलप्रस्कंदनार्थंपात्रंशूर्पंकृष्णा
जिनंउलूखलंमुसलंचरुस्थालींमेक्षणंउपवेषमेकांसमिधंसंमार्गदर्भान्अवज्वलनदर्भान्
हविरासादनार्थंदर्भान्बर्हिःतंडुलान्आज्यंचासादयामि। पवित्रेकृत्वा। समानप्रछिन्नाग्रौ
दर्भौ० छित्वा। अद्भिरनुमृज्य। अपरेणाग्निंशूर्पंनिधायशूर्पेपवित्रेनिधायव्रीहीन्चतुरोमुष्टीन्निरु
प्य। उत्तरेणाग्निंव्रीहिमच्छूर्पंनिधायप्रोक्षणीपात्रेतिरःपवित्रंअंतर्धा[illegible]आनीयउदगग्रा

वित्राभ्यां। शूर्पस्थान्व्रीहीन्त्रिःप्रोक्ष्यपात्राण्युत्तानानिकृत्वात्रिःसर्वाभिःप्रोक्षति। ततःपत्नीअ
ग्नेरुत्तरतःकृष्णाजिनंबहिर्विग्रासनंत्रिरवधूयप्रत्यग्ग्रीवमुपरिष्टाल्लोमतदास्तीर्यतस्यमध्येउलूखलमुप
समस्यतत्रोलूखलंसंस्थाप्यतस्मिन्व्रीहीनोप्यासीनैवमुसलेनावहत्यउलूखलस्यपुरस्ताच्छूर्पंनिधा
यउलूखलात्स्थास्तंडुलान्छूर्पेनिक्षिप्यकृष्णाजिनस्योत्तरतस्थित्वाशूर्पेणतुषान्छूर्पाग्रेणध्वंसयित्वातान्
तुषान्दक्षिणहस्तेनकृष्णाजिनस्याधस्तान्निक्षिपत्यनिराश्यन्। ततोदक्षिणेनैवहस्तेननिक्षिप्तांस्कणा
न्निष्पीड्यापउपस्पृश्यतंडुलान्विविच्यप्रस्कंदनार्थंआसादितेपात्रेप्रस्कंदयित्वातानाहृत्योलूख
लेनिक्षिप्यत्रिष्फलीकृत्यफलीकरणानिकृष्णाजिनस्योत्तरतोनिक्षिप्यतंडुलान्प्रक्षाल्याग्नेःपश्चा
त्प्रक्षालनोदकंनिनयति। ततःकर्तास्वयमेवप्रक्षाल्यचरुस्थाल्यामोप्यमेक्षणेनालोड्यश्रपयेत्।
आसादितान्संमार्गदर्भान्सव्याग्रान्गृहीत्वादर्वींमेक्षणंचादायदक्षिणहस्तेनवाग्नौसहैवनिष्ट
प्यमेक्षणंदर्भेषुनिधायसंमृज्यपुनर्निष्टप्यनिदधाति। संमार्गानभ्युक्ष्याग्नावादधाति। आज्यंवि
लाप्यपवित्रांतर्हितायामाज्यस्थाल्यामाज्यंनिरूप्योपवेषेणोदीचोंगारान्निरूह्यतेष्वाज्यमधि
श्रित्यावद्योत्स्यदर्भतरुणाभ्यांप्रज्वलितस्यचरुणासहाज्यंत्रिःपर्यग्निकृत्वाउदगुद्वास्यउपवेषेणोदी
चोंगारान्प्रत्यूह्यउपवेषंनिरस्यापउपस्पृश्यअपरेणाग्निंबर्हिरास्तीर्यतत्राज्यपात्रंनिधायउदगग्रा

भ्यांपवित्राभ्यांपुनरुत्पूयमाज्यंत्रिरुत्पूयपवित्रेप्रोक्ष्याग्नावाधायश्रृतंचरुमभिघार्यउदगुद्वास्य अग्नेःपश्चात्
आज्यस्योत्तरतः आसाद्य अदितेनुमन्यस्व अनुमते॰ सरस्वते॰ देव॰ प्रसुव॰ ततस्तूष्णींआसादिता
समिधं अभ्यज्याग्नावाधायमेक्षणेनचरोर्मध्यादंगुष्ठपर्वमात्रमवदानमादायप्रज्वलितेग्नौ। अग्नयेस्वाहा।
इतिभार्यान्वारब्धोजुहोति। अग्नयइदं॰ पुनः उत्तरार्धात्भूयउपहत्य। अग्नयेस्विष्टकृतेस्वाहा। इतिअ
संसक्तांपूर्वाहुत्योत्तरार्धपूर्वार्धेजुहोति। अग्नयेस्विष्टकृतइदं॰ मेक्षणमग्नौप्रक्षिपेत्। ततःपरिस्तर
णान्विस्तीर्यस्रुवेणप्रायश्चित्ताहुतीर्हुत्वा अस्मिन्प्रायश्चित्तार्थंव्यस्तसमस्तव्याहृतिहोमंकरिष्ये।
भूःस्वाहा। अग्नयइदं॰ भुवः॰ वायव॰ स्वःस्वा॰ सूर्या॰ भूर्भुवःस्वः॰ प्रजाप॰ यथासंभवंप्रायश्चि
त्तंकृत्वा। सांगतासि॰ सर्वप्रायश्चित्तंक॰ भूर्भुवःस्वःस्वा॰ प्रजाप॰ अदितेन्वम॰ अनुमत॰ सरस्व॰
देवसवितः प्रासावीः। यज्ञेनमस्तेयज्ञ। नमोन॰ उपतनमः। अग्नयेनमः। चंदनं॰ मंत्रपुष्पं॰ मानस्तो
केतिविभूतिंधृत्वा। स्वस्तिश्रद्धां॰ प्रमादात्कुर्व॰ यस्यस्मृत्या॰ विष्णवेनमइतित्रिः। अनेनमयाकृतेन
आग्नेयस्थालीपाकाख्येनकर्मणाभगवान्परमेश्वरःप्रीयतां। नमम। तत्सद्ब्र॰ स्कं॰। कृतस्याग्नेयस्था
लीपाकयागकर्मणः सांगतायैतत्संपूर्णफलावाप्तयेब्राह्मणायदक्षिणाप्रदानंकरिष्ये। तंदगांब्राह्मण
पूजनं॰ ध्य। हिरण्यगर्भ॰ कृतस्याग्ने॰ फलावाप्तये अनडुन्निष्क्रयद्रव्यं अमुकशर्मणेब्रा॰ प्रददे ॥१

प्रतिगृह्यतां। प्रतिगृह्णामि। कृतस्याग्नेयस्था॰ न्यूनयथाकालंत्र्यवरान्ब्राह्मणान्भोजयिष्ये। कृतं
नाग्नेयस्थालीपाकाख्येनकर्मणाभगवान्परमेश्वरःप्रीयतां। ॥अथचरुरुत्सेकप्रायश्चित्तं।
प्रधानाहुत्याकुप्रायश्चित्तसंभवात्। अस्मिन्कर्मणि अमुकस्यांदिशिचरूत्सेकप्रायश्चित्तंक॰
पूर्वे। अग्नयेस्वाहा। दक्षिणस्यां। यमायस्वा॰ पश्चिमे। वरुणाय॰ उत्तरे। सोमायस्वा॰ अन्यदि
क्षु। व्याहृतिभिः भूर्भुवःस्वःस्वाहा। प्रजापतयइ॰ उत्सिक्तंचरुमाप्याययति। आप्यायस्वस
मेतुते वि॰ गथे। संतेपयांसि समुयंतुवाजाः संवृष्ण्यान्यभिमातिषाहः। आप्यायमा
नो अमृताय सोमादि॰। इतिद्वाभ्यांचरुमाप्याययति। यन्मआत्मनो॰ स्वाहा। मिंदवलग्न॰ पु
पुनरग्नि॰ मक्ष्याः स्वाहा। द्वे आज्याहुती अग्नौजुहुयात्। सांगतासि॰ ध्य। भूर्भुवःस्वः हा। प्रजाप॰
एवंसप्तरात्रसप्तरात्रपर्यंतंअयाश्चाग्नेत्येकं मनोज्योतिरितिद्वितीयांहुत्वापूर्ववदतीतहोमान्काल
प्राप्तहोमंचहुत्वा। सप्तरात्रानंतरं आद्वादशरात्रहोमपर्यंतंपूर्वाहुतिभ्यांसहतंतुमतीत्यर्जुहुयात्। अती
तहोमान्कालप्राप्तहोमंचजुहुयात्। द्वादशरात्रहोमविच्छेदेपुनराधानंकार्यं॥ ॥ ॥
अथाग्निविच्छेदप्रायश्चित्तक्रममाह। त्रिरात्रंविच्छेदेप्राणायामशतं। विंशतिरात्रंविच्छेदे एकरात्रमु

औ॰ प पवासः। अशक्तश्चेत् षट् ब्राह्मणभोजनं। मासद्वये त्रिरात्रमुपवासः। संवत्सरविच्छेदे प्राजापत्यः। द्विवर्ष
विच्छेदे मासं पयोव्रतं चांद्रायणं गोदानं वेत्यादि द्रूक् कालकृततारतम्येन प्रायश्चित्तं दंपती सह कुर्वीया
१ तां॥ ॥अथ औपासनहोमः। स्कमु॰ र्थं सायमौपासनहोमं व्रीहिभिर्होष्यामि। अग्निं प्रज्वाल्य। चत्वा
रिशृंगेति ध्यात्वा। अग्निं परिस्तीर्य पुरस्ताद्दक्षिणतः पश्चादुत्तरतः। उत्तरेणाग्निं दर्भेषु होमद्रव्यं त
दुपरि प्रागग्रां प्रादेशमात्रीं समिधं निधाय। दक्षिणेन हस्तेनाग्नौ प्रज्वालितैर्दर्भैरवाचीनज्वालैरु
परिज्वलयित्वा तैरवज्वलितैर्दर्भैः त्रिः पर्यग्निकृत्वा दर्भान्निरस्याप उपस्पृश्य अग्नेः पश्चात्कूर्चे होम
द्रव्यं निदधाति। ततः अदितेनुम॰ स्रु॰ वा। संमार्गदर्भानादाय दक्षिणहस्तमग्नौ निष्टप्य दर्वीं वा तैः संमृज्य
पुनर्निष्टप्य संमार्गान्निभ्युक्ष्य अग्नावादधाति। पस्त्वाहृदा॰ तेस्वलि। इति द्वाभ्यामग्निमभ्यर्च्य होम
द्रव्यापरिस्थं समिधं तूष्णीं प्रागग्रमग्नावाधाय। द्वादशपर्वपरिमितं होमद्रव्यं संस्पृष्टांगुलि दक्षिणह
स्ततले गृहीत्वा। ॐ अग्नये स्वाहा। इति ज्वलंत्यां समिधि मूलाद्व्यंगुलपरिमितं प्रदेशं त्यक्त्वोत्तर
पार्श्वेन जुहोति। अग्नय इदं। ततः पूर्वाहुतितोधिकमवशेषितं द्रव्यं सर्वमादाय प्रजापतिं मनसा ध्या
यन् प्रजापतये स्वाहेति मनसा मंत्रमुच्चारयन् पूर्वाहुतितो द्व्यंगुलपरिमितं प्रदेशं त्यक्त्वोत्तरपार्श्वेन
जुहोति। प्रजापतय इदं॰ परिस्तरणान्युत्तरतो विसृजेत्। अदितेन्वमंस्थाः॰ प्रासावीः। इत्युपस्थाय। ११

अग्निमूर्धा॰ न्वति। त्वामग्ने पुष्क॰ घतः। अयमग्निः सहस्रिणो॰ यीणां। प्रजापते॰ यीणां। उपतिष्ठेत
यत्तनमस्ते॰ उपतेनमः ३ अग्ने नय सुपथा॰ विधेम। अग्निं संपूज्य। मानस्तोके॰ मेत। विभूतिं धृत्वा
स्वस्तिश्रद्धां॰ प्रमादात्कु॰ यस्यस्मृत्या॰ ज्ञात्वाज्ञात्वा॰ श्वतः। विष्णुं स्मृत्वा। अनेन सायमौपासन
होमेन भगवान्यज्ञनारायणः प्रीयतां। ।अथ प्रातरौपासनहोमः। स्कमु॰ र्थं प्रातरौपासनहोमं
व्रीहिभिर्होष्यामि। अग्निध्यानादि समिदाधानांतं सायंहोमवत्। प्रधानहोमे विशेषः। सूर्याय
स्वाहा। सूर्यायेदं॰ प्रजापतये स्वा॰ प्रजापतय इदं॰ उत्तरपरिषेकांतं पूर्ववत्। उपस्थाने विशेषः। उद्
यंतमस॰ त्तमं। उदुत्यं जातवेदसं॰ सूर्यं। चित्रं देवाना॰ पश्च। प्रजापतेनत्व॰ रयीणां। इत्युपस्थानं
कृत्वा सर्वं सायंहोमवत् कृत्वा विष्णुं स्मरेत्। अनेन प्रातरौपासनहोमेन भगवान्परमेश्वरः प्रीयतां
इति प्रातरौपासनहोमः। अनाज्ञातादिमंत्रपठनं। अनाज्ञातं॰ तथं। पुरुषसं॰ यत्पाकत्रा मनसा॰
भूर्भुवः स्वः। आभिर्गीर्भि॰ यन्म आत्मनो॰ पुनस्त्वादित्या॰ मेनात्याति॰ त्वन्नो अग्ने॰ सत्वन्नो॰
यस्त्वास्वश्वः स्वाहि॰ कांडडूमाप॰ नम। अभृणा अस्मिन्न॰ वषट्ते॰ विष्णवेनमः ३॥ ॥६
अथाग्निनाशप्रायश्चित्तं। एवं॰ र्थं अग्न्यनुगतप्रायश्चित्तं करिष्ये। तदंगस्थंडिला॰ ध्ये। श्रोत्रियागारादग्निंम

अ। प्रा० न० १२

भिखालैःकिंकंवाहत्यधात्वा।परिस्तीर्यअग्नेरुत्तरतःपात्राण्यासादयति।दर्वीं।आज्य०प्रोक्षणी०एकंसमिधः
संमार्ग०अनज्व०बर्हिःआज्यंचासादयति।पवित्रकरणादिपवित्रेऽग्नावाधायपत्यंलंकृत्वा।आदिते०तूष्णींसमि
धमग्नावाधाय।अयाश्चाग्नेस्यनभिशस्तिश्चसत्यमित्वमयाअसि।अयसामनसाधृतोयसाहव्यमूहिषेया
नोधेहिभेषजंस्वाहा।आहुतिचतुष्टयंकृत्वा।परिस्तरणानिवि०आदितेन्व०प्रासावीः।मज्ञनम०स्वस्ति
श्रद्धां०अनेनअग्न्यनुगतप्रायश्चित्ताख्येनकर्मणाभगवान्परमेश्वरःप्रीयतां॥ ॥अथाऽग्निनामानि
पावकोलौकिकोह्यग्निःप्रथमःसंप्रकीर्तितः।अग्निस्तुमारुतोनामगर्भाधानेविधीयते।१।ततःपुंसव
नेत्तयःपवमानस्तथैवच।सीमंतेमंगलोनामप्रबलोजातकर्मणि।२।नाम्निवैपार्थिवोह्यग्निःप्राशनेतुशु
चिःस्मृतः।सभ्यानामसचौलेतुव्रतादेशेसमुद्भवः।३।गोदानेसूर्यनामाचविवाहेयोजकस्मृतः।आवस
थ्यद्विजातयोवैश्वदेवेतुरुक्मकः।४॥प्रायश्चित्तेविटश्चैवपाकयज्ञेषुपावकः।देवानांहव्यवाहश्चपितृ
णांकव्यवाहनः।५।शांतिकेवरदःप्रोक्तःपौष्टिकेबलवर्धनः।पूर्णाहुत्यनिलोनामाक्रोधाग्निश्चाभि
चारिके।६।वश्यार्थेकामदोनामवनदाहेतुदूषकः।कुक्षौतुजाठरोज्ञेयःक्रव्यादोमृतदाहने।७।वह्निना
मालक्षहोमेकोटिहोमेहुताशनः।समुद्रेवाडवोह्यग्निःक्षयेसंवर्तकस्तथा।८।ब्रह्मावैगार्हपत्यश्चईश्व
रोदक्षिणस्तथा।विष्णुराहवनीयस्यादग्निहोत्रेत्रयोऽग्नयः।९।ज्ञात्वाचैतानिनामानिगृह्यकर्मसमारभेत् १२

श्रीःस्मार्तेआयतनेत्रयःपक्षाः।अष्टादशांगुलंविंशतिअंगुलंचतुर्विंशतिअंगुलंवाकृत्वाषडंगुलं
उच्चैःविस्तीर्णंषडंगुलंबाह्यांगुलविस्ताराभ्यंतराचतुरंगुलाप्रथमामेखला।द्वितीयमेखलाषडंगुला
उच्चैः।चतुरंगुलविस्तीर्णा।एवंद्वादशांगुलप्रकारेणआयतनंकुर्यात्।अथपरिधिप्रमाणं।परिधिंअप
रेणाग्निंषट्त्रिंशदंगुलं३६उदगग्रंनिधाय।दक्षिणेनाग्निंअष्टत्रिंशदंगुलं३८प्रागग्रंमध्यमेनसंस्पृ
ष्टं।उत्तरेणाग्निंचतुस्त्रिंशदंगुलं३४प्रागग्रंपरिस्तरणेपरिदधाति।समित्पवित्रंवेदश्चत्रयःप्रा
देशसंमिताः।स्मार्तेप्रादेशमात्रावाद्विगुणःपरिधिःस्मृतः। ।इतिहिरण्यकेशीपुनःसंधानआ
ग्नेयस्थालीपाकसायंप्रातरौपासनहोमौअग्निविच्छेदप्रायश्चित्ताऽग्निनामानिआयतनवि
धिःपरिधिप्रमाणंचेतिएतानिलिखितानि॥ ॥अभ्यंकरोपनाम्नेदंनाम्नागंगाधरेण
वै॥पुनःसंधानसंज्ञंयद्धिखिलंपुस्तकंकिरलु॥क्रोधनेद्वमासिमार्गेकृतौहेमंतसंज्ञके॥सि
तपक्षेद्वितीयायांवासरेंदोःप्रयत्नतः॥ऋक्षेज्ञयन्तलातस्यकृष्णायाःसंनिधौतथा॥
आपन्निमित्तंअद्यप्रतिपत्सायंकालमारभ्यचतुर्दशीसायंकालपर्यंतंअमुकसंख्याकान्सायमौपासनहोमान्
अपकृष्यसर्वान्समस्ततंत्रेणआहुतिभिर्होष्यामि॥ ॥ ॥ ॥ ॥ ॥ ॥ श्रीः

इदं हिरण्यकेशीयपुनःसंधानखपुस्तकं समाप्तं छ

```
[OrderDescription]
,CREATED=22.07.19 14:21
,TRANSFERRED=2019/07/22 at 14:27:51
,PAGES=14
,TYPE=STD
,NAME=S0001068
,Book Name=M-1971-HIRANAYKESHITHUNAHSANDHAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,
```